कङ्कपत्रः, पुं, (कङ्कस्य पक्षिविशेषस्य पत्रमेव पत्रं पक्षो यस्य ।) बाणविशेषः । इति हलायुधः ॥ (यथा रामायणे ६ । २८ । ४ ।
"विव्यधुर्घोररूपास्ते कङ्कपत्रैरजिह्मगैः" ॥
कङ्कस्य पक्षिविशेषस्य पत्रम् । यथा,
"नखप्रभाभूषितकङ्कपत्रे" ॥ रघुः २ । ३१ ॥)

कङ्कमाला, स्त्री, (कङ्कं चापल्यं करचाञ्चल्यं मलते धारयति । ककि चापल्ये+घञ् । कङ्क+मल धृतौ । मलधातोः उपपदे कर्म्मण्यण् टाप् च ।) करतालीवाद्यम् । इति शब्दरत्नावली ॥

कङ्कमुखः, पुं, (कङ्कस्य मुखमिव मुखं यस्य ।) सन्दंशः । इति हेमचन्द्रः ॥ साँड़াशि इति भाषा । (क्ली, शल्योद्धरणार्थः यन्त्रभेदः । स तु अस्थिविनष्ट-शल्योद्धरणार्थमुपदिश्यते ॥) अस्य प्रशंसा यथा,
"निर्व्वर्त्तते साध्ववगाहते च
शल्यं प्रगृह्योद्धरते च यस्मात् ।
यन्त्रेष्वतः कङ्कमुखं प्रधानं
स्थानेषु सर्व्वेष्वविकारि चैव" ॥ सुश्रुते ॥
(त्रि, यथा रामायणे ६ । ७९ । ६९ ॥
"व्याघ्र-सिंहमुखान् वाणान् काककङ्कमुखानपि" ॥)

कङ्करं, क्ली, (कं जलं कीर्य्यतेऽत्र । कं+कॄ आधारे अप् ।) तक्रम् । इति हेमचन्द्रः ॥

कङ्करः, त्रि, (कं सुखं किरति क्षिपतीति । कं+कॄ+अच् ।) कुत्सितः । इति हेमचन्द्रः ॥

कङ्करोलः, पुं, (कङ्क इव लोलः लस्य रः ।) निकोचकवृक्षः । इति शब्दचन्द्रिका ॥ काँकरोल इति ख्याता लता च ॥

कङ्कलोड्यं, क्ली, (कङ्क इव लोड्यते आलोड्यते । इति कङ्क+लोड्+ण्यत् ।) अङ्कलोड्यम् । चटिखिता चिञ्चोड़मूल इति च भाषा । अस्य गुणाः । गुरुत्वम् । अजीर्णकारित्वम् । शीतलत्वञ्च । इति कश्चिद्राजवल्लभः ॥

कङ्कशत्रुः, पुं, (कङ्कस्य शत्रुः । पृश्निपर्ण्यास्तु कङ्क-नाशकत्वमाङः अत अस्य तथात्वम् ।) पृश्निपर्णी । इति शब्दचन्द्रिका ॥

कङ्कशायः, पुं, (कङ्क इव शेते । शीङ्+णः ।) कुक्कुरः । इति शब्दमाला ॥

कङ्का, स्त्री, (कङ्कते चापल्यं गच्छति या पित्रा-द्यादरवशात् । ककि+अच् ।) उग्रसेनराजकन्या । सा तु वसुदेवानुजपत्नी । (यथा, श्रीभागवते । ९ । २४ । २५ ।
"कंसा कंसवती कङ्का शूरभू राष्ट्रपालिका ।
उग्रसेनदुहितरो वसुदेवानुजस्त्रियः" ॥)
गोशीर्षचन्दनम् । तद्यथा ।
"गोशीर्षं चन्दनं ख्याताम्रमुत्पलगन्धिकम् ।
कङ्का" इत्यादि शब्दमाला ॥

कङ्कालः, पुं, (कं सुखं शिरो वा कालयति क्षिपतीति कं+कालि+अच् ।) शरीरास्थि । इत्यमरः । २ । ६ । ६९ ॥ समुदितशरीरास्थिसंघात-स्त्वङ्मांसरहितः । इति भरतः ॥ तत्पर्य्यायः । करङ्कः २ अस्थिपञ्जरः ३ । इति वैद्यकम् ॥ (यथा, सुन्दोपसुन्दोपाख्याने २ । २४ । "अस्थिकङ्काल-सङ्कीर्णा भूर्बभूव" ॥)

कङ्कालमाली, [न्] पुं, (कङ्कालानां माला अस्ति अस्य व्रीह्यादित्वादिनिः ।) महादेवः । इति शब्द-रत्नावली ॥

कङ्गुः, पुं, (कङ्कते औद्धत्यं लौल्यं वा प्राप्नोतीति । ककि गतौ+उन् ।) उग्रसेनपुत्त्रः । स तु कंसा-सुरभ्राता । (यथा, श्रीभागवते ९ । २४ । २४ ॥ ("कंसः सुनामा न्यग्रोधः कङ्कः कङ्गुः सुहूस्तथा" ॥) क्वचित् शङ्कुरितिपाठः ।) कङ्गुटणम् । इति द्वि-रूपकोषः ॥

कङ्गुष्ठं, क्ली, (कङ्गुस्तृणविशेषः तस्य समीपे तिष्ठति । कङ्गु+स्था+क+षत्वम् ।) पर्व्वतीयमृत्तिकाविशेषः । तत्पर्य्यायः । कालकुष्ठम् २ विरङ्गम् ३ रङ्गदायकम् ४ रेचकम् ५ पुलकम् ६ शोधकम् ७ कालपालकम् ८ । तद्द्विधा रजताभं स्वर्णाभञ्च । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफवातव्रण-शूलनाशित्वम् । रेचकत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"पीतप्रभं गुरु स्निग्धं श्रेष्ठं कङ्गुष्ठमादिमम् ।
श्यामं पीतं लघु त्यक्तसत्त्वं नेष्टं हि रेणुकम्" ॥
(इदञ्च हिमालयशिखरे जायते । यदुक्तं —
"हिमवत् पादशिखरे कङ्गुष्ठमुपजायते ।
तत्रैकं नालिकाख्यं स्यात्तदन्य द्रेणुकं स्मृतम्" ॥
"कङ्गुष्ठं रेचनं तिक्तं कटूष्णं वर्णकारकम् ।
क्रमिशोथोदराध्मानगुल्मानाह कथापहम्" ॥)

कङ्केरः, पुं, (कङ्कते भक्षणाय लौल्यं गच्छति । ककि +एरः ।) काकविशेषः । तत्पर्य्यायः । द्वारबलि-भुक् २ । इति त्रिकाण्डशेषः ॥

कङ्केलिः, पुं, (कं सुखं तस्मै केलिः यत्र ।) अशोक-वृक्षः । इति राजनिर्घण्टः ॥

कङ्केल्लः, पुं, (ककि+एल्लप्रत्ययः ।) वास्तूकम् । इति शब्दमाला ॥

कङ्केल्लिः, पुं, (कङ्क+बाहुलकात् एलिः पृषोदरादि-त्वात् लश्च ।) अशोकवृक्षः । इति त्रिकाण्डशेषः ॥

कङ्खं, क्ली, (कं सुखं खलत्यनेन । खल+बाहुलकात् डः ।) भोगः । इति शब्दमाला ॥ (कं+खं । ब्रह्म । यथा छान्दोग्योपनिषदि ४ । १० । ५ ।
"प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति स होवाच विजानाम्यहं यत्प्राणो ब्रह्म कञ्च तु खञ्च न विजानामीति ते होचुर्यद्वाव कं तदेव खं यदेव खं तदेव कमिति प्राणञ्च हास्मै तदाकाशञ्चोचुः" ॥)

कङ्गुः, स्त्री, (कं सुखं अङ्गति अङ्गयति वा अगि गतौ+ण्यन्तादस्मान्त् मृगय्वादित्वात् कुः शक-न्ध्वादित्वात् अकारस्य लोपश्च ।) पीततण्डुला । काङ्गनि इति भाषा । तत्पर्य्यायः । प्रियङ्गुः २ । इत्यमरः ॥ २ । ९ । २० । कङ्गूः ३ प्रियङ्गूः ४ । इति तट्टीका ॥ (तथाचोक्तम् ।
"स्त्रियां कङ्गुप्रियङ्गू द्वे कृष्णरक्तसितास्तथा ।
पीता चतुर्व्विधा कङ्गुस्तासां पीता वरा स्मृता" ॥)

कङ्गुका, स्त्री, (कं सुखं अङ्गयति प्रापयति ज्ञापयति वा । अगि गतौ ण्यन्तान् मृगय्वादित्वात् कुः इदित्वात् नुम् शकन्ध्वादित्वात् अलोपे सन्धिः । स्वार्थे कन् ततष्टाप् ।) कङ्गुः । अस्य गुणाः । धातुशोषणत्वम् । पित्तश्लेष्मनाशित्वम् । रूक्षत्वम् । वायुवर्द्धकत्वम् । पुष्टिकारित्वम् । गुरुत्वम् । भग्न-सन्धानकारित्वञ्च । इति राजवल्लभः ॥

कङ्गुनी, स्त्री, (कंग्वा नीयते कङ्गुशब्देन ज्ञायते इत्यर्थः । कङ्ग+नी+बाहुलकात् कर्म्मणि डः । गौरादित्वात् ङीष् ।) धान्यविशेषः । काङ्गनि इति भाषा । तत्पर्य्यायः । प्रियङ्गुः २ कङ्गुः ३ चीनकः ४ पीततण्डुलः ५ अत्यन्तसुकुमारः ६ । अस्या गुणाः । मधुरत्वम् । रुचिकारित्वम् । कषायत्वम् । स्वादुत्वम् । शीतलत्वम् । वातकारि-त्वम् । पित्तदाहनाशित्वम् । रूक्षत्वम् । भग्नास्थि-बन्धकारित्वञ्च । इति राजनिर्घण्टः ॥

कङ्गुनीपत्रा, स्त्री, (कङ्गुन्याः पत्रमिव पत्रमस्याः ।) पण्यान्धाहृणम् । इति राजनिर्घण्टः ॥

कङ्गुलः, पुं, (कङ्गुं लाति गृह्णाति अनेन कङ्गु+ला+बाहुलकात् घञर्थे करणे कः ।) पाणिः । इति शब्दचन्द्रिका ॥

कच रवे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) कचति । रवः शब्दः । इति दुर्गादासः ॥

कच इ बन्धे । त्विषि । इति कविकल्पद्रुमः ॥ (भ्वां-परं बन्धे सकं दीप्तौ अकं-इदित्-सेट् ।) इ कञ्चति । इति दुर्गादासः ॥

कच ङ बन्धे । त्विषि । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं बन्धे सकं दीप्तौ अकं-सेट् ।) ङ कचते कचते । त्विट् दीप्तिः । इति दुर्गादासः ॥

कचः, पुं, (कचते शोभते शिरसीति । कच्+पचा-द्यच् । कच्यते बध्यते इति कच बन्धे+कर्म्मणि अप् वा ।) केशः । इत्यमरः ॥ २ । ६ । ९५ ॥ (यथा, महाभारते १ । १२८ । १९ ॥)
"कचेषु च निगृह्यैतान् निविहत्य बलाद्बली ।
चकर्ष क्रोशतो भूमौ घृष्टजानुशिरोंसकान्" ॥)
वृहस्पतिपुत्त्रः । (कचते दीप्यते तपस्तेजसेति कच्+दीप्तौ+पचाद्यच् । पुरा किल सुरासुर-संग्रामे असुराणां यानेव देवा निजघ्नुस्तांश्चासुर-गुरुरुशनाः सञ्जीवनीविद्यया पुनर्जीवयामास । सुरगुरुर्वृहस्पतिः पुनस्तद्विद्यानभिज्ञतया सुरान् रणनिहतान् जीवयितुं न शशाक । तद्दर्शनभीत. देवा गुरुपुत्त्रं कचमुपागम्य अर्थ्याभिर्वाग्भिः सन्तोष्य तं सञ्जीवनीलाभाय शुक्रसकाशं प्रेरया-मासुः । कचोऽपि सुरकार्य्यसिद्धये गुरुत्वेनाङ्गी कृत्य नितरां भक्त्या परिचर्य्यया च काव्यं परितो-षयन् ब्रह्मचर्य्यमालम्ब्याधीतवान् । क्रूरप्रकृतयो दैत्याः खलु कचाभिसन्धिं विज्ञाय तं वारद्वयं निहत्यापि यदा पूर्णकामा नासन् तदा भूयोऽपि तन्मांसादिकं लवशः कृत्वा शुक्रमेव सुरयासह भोजयामासुः शुक्रस्तु स्वदुहितुर्देवयान्याः सस्नेह-निर्ब्बन्धातिशयेन स्वोदरगतं कचं सञ्जीवनीविद्यां प्रदायाजीवयत् । ततः प्राप्तजीवः कृतार्थश्च कचोऽतीवहृष्टचित्तया देवयान्या पतित्वेन अनुरुद्धोऽपि सम्बन्धानुरोधात् नैव स्वीचकार । सुतरां क्रोधपरतन्त्रया तया निष्फलविद्यो भवेत्यभि-